पुरतः, [स्] व, (पुरति अग्रे गच्छतीति । पुर + बाहुलकात् अतसुच् ।) अग्रतः । इत्यमरः ।३।४।७॥ ( यथा, राजतरङ्गिण्याम् । १ । १०७ ।
"निर्गते मञ्जरीकुञ्जादपश्यत् पुरतस्ततः ।
कन्ये नीलनिचोलिन्यौ स केचिचारुलोचने ॥")

पुरतटी, स्त्री, ( पुरस्थिता तटीव । ) हट्टी । क्षुद्रहट्टः । इति हारावली । १६४ ॥

पुरद्वारं, क्ली, ( पुरस्य द्वारम् । ) नगरद्वारम् । तत्पर्य्यायः । गोपुरम् २ । इत्यमरः ।२।२।१६॥ ( यथा, मनुः । ५ । ९२ ।
"दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ।
पश्चिमोत्तरपूर्व्वैस्तु यथायोगं द्विजन्मनः ॥")

पुरद्विट्, [ ष् ] पुं, ( पुरं द्वेष्टीति । द्विष् + क्विप् । मयनिर्म्मितानां पुरविशेषाणां दाहकत्वादस्य तथात्वम् । ) शिवः । इति जटाधरः ॥ ( यथा, भागवते । ४ । ६ । ७ ।
"स इत्थमादिश्य सुरानजस्तु तैः
समन्वितः पितृभिः सप्रजेशैः ।
ययौ स्वधिष्ण्यान्निलयं पुरद्विषः
कैलासमद्रिप्रवरं प्रियं प्रभोः ॥")

पुरन्दरं, क्ली, ( पुर् + दारि + खच् । ) चविकम् । इति शब्दचन्द्रिका ॥

पुरन्दरः, पुं, ( अरीणां पुरो दारयतीति । दॄ + णिच् + "पूःसर्व्वयोर्दारिसहोः ।" ३ । २ ।४१ । इति खच् । "वाचंयमपुरन्दरौ च ।" ६।३।६९। इति निपातितः । ) इन्द्रः । इत्यमरः ।१।१।४४॥ ( यथा, महाभारते । ३ । १०१ । ६ ।
"कालेयभयसन्त्रस्तो देवः साक्षात् पुरन्दरः ।
जगाम शरणं शीघ्रं तन्तु नारायणं प्रभुम् ॥"
पुरं गेहं दारयतीति । दारि + खच् । निपातितः ।) चौरः । यथा,—
"समांसमीना यदि पाकशाला
समांसमीना दश धेनवः स्युः ।
पुरन्दरस्याविषयं यदि स्यात्
पुरन्दरस्यापि पुरं न याचे ॥"
इत्युद्भटः ॥

पुरन्दरा, स्त्री, ( पुरं दारयति प्रवाहैरिति । दारि + खच् । निपातनात् साधुः । ततष्टाप् ।) गङ्गा । इति हारावली ॥

पुरन्ध्रिः, पुरन्ध्री } स्त्री, (स्वजनसहितं पुरं धारयतीति । धृञ + खच् । गौरादित्वात् ङीष् । पृषोदरादित्वात् ह्रस्वो वा । ) पतिपुत्त्रदुहित्रादिमती । इति भरतः ॥ तत्पर्य्यायः । कुटुम्बिनी । इत्यमरः ।२।६।६॥ (यथा, रघुः ।७।२८।
"तौ स्नातकैर्बन्धुमता च राज्ञा
पुरन्ध्रिभिश्च क्रमशः प्रयुक्तम् ।
कन्याकुमारौ कनकासनस्थौ
आर्द्राक्षतारोपणमन्वभूताम् ॥")
क्षौमाद्यम् । इति राजनिर्घण्टः ॥

पुरश्चरणं, क्ली, ( पुरोऽग्रतश्चरणं मन्त्रजपादिपञ्चाङ्गकर्म्माचरणमिति । ) पुरस्क्रिया । सा तु स्वेष्टदेवतामन्त्रसिद्ध्यर्थं तद्देवतापूजापूर्व्वकं तन्मन्त्रजपहोमतर्पणाभिषेकब्राह्मणभोजनरूपपञ्चाङ्गकसाधना । यथा, योगिनीहृदये ।
"गुरोराज्ञां समादाय शुद्धान्तःकरणो नरः ।
ततः पुरस्क्रियां कुर्य्यान्मन्त्रसंसिद्धिकाम्यया ॥
जीवहीनो यथा देही सर्व्वकर्म्मसु न क्षमः ।
पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्त्तितः ॥
तस्मादादौ स्वयं कुर्य्यात् गुरुं वा कारयेद्बुधः ।
गुरोरभावे विप्रं वा सर्व्वप्राणिहिते रतम् ।
स्निग्धं शास्त्रविदं मित्रं नानागुणसमन्वितम् ॥
स्त्रियं वा सद्गुणोपेतां सपुत्त्रां विनियोजयेत् ॥
आदौ पुरस्क्रियां कर्त्तुं स्थाननिर्णय उच्यते ॥"
योगिनीहृदये ।
"पुण्यक्षेत्रं नदीतीरं गुहापर्व्वतमस्तकम् ।
तीर्थप्रदेशाः सिन्धूनां सङ्गमः पावनं वनम् ॥
उद्यानानि विविक्तानि विल्वमूलं तटं गिरेः ॥
तुलसीकाननं गोष्ठं वृषशून्यं शिवालयम् ॥
अश्वत्थामलकीमूलं गोशालाजलमध्यतः ।
देवतायतनं कूलं समुद्रस्य निजं गृहम् ॥
साधनेषु प्रशस्तानि स्थानान्येतानि मन्त्रिणाम् ।
अथवा निवसेत्तत्र यत्र चित्तं प्रसीदति ॥"* ॥
तथा ।
"गृहे शतगुणं विद्याद्गोष्ठे लक्षगुणं भवेत् ।
कोटिर्देवालये पुण्यमनन्तं शिवसन्निधौ ॥
म्लेच्छदुष्टमृगव्यालशङ्कातङ्कविवर्ज्जिते ।
एकान्तपावने निन्दारहिते भक्तिसंयुते ॥
सुदेशे धार्म्मिके देशे सुभिक्षे निरुपद्रवे ।
रम्ये भक्तजनस्थाने निवसेत् तापसः प्रिये ! ॥
गुरूणां सन्निधाने च चित्तैकाग्रस्थले तथा ।
एषामन्यतमस्थानमाश्रित्य जपमाचरेत् ॥
यत्र ग्रामे जपेन्मन्त्री तत्र कूर्म्मं विचिन्तयेत् ॥"
गौतमीये ।
"पर्व्वते सिन्धुतीरे वा पुण्यारण्ये नदीतटे ।
यदि कुर्य्यात् पुरश्चर्य्यां तत्र कूर्म्मं न चिन्तयेत् ॥"
विल्वमूलादावपि कूर्म्मचिन्ता नास्ति तदुक्तं वैशम्पायनसंहितायाम् ।
"पुण्यक्षेत्रं गृही तीर्थं देवतायतनं शुभम् ।
नदीतीरं तथा सिन्धुसङ्गमोऽतिमनोहरः ॥
पर्व्वतस्य गुहाश्चैव तथा पर्व्वतमस्तकम् ।
विल्वमूलं समुद्रञ्च वनमुद्यानमेव च ॥
एषु स्थानेषु विप्रेन्द्र ! कूर्म्मचक्रं न चिन्तयेत् ।
ग्रामे वा यदि वा वास्तौ गृहे तच्च विचिन्तयेत् ॥"

अथ पुरश्चरणे भक्ष्यादिनियमः ।

गौतमीये ।
"पुरश्चरणकृन्मन्त्री भक्ष्याभक्ष्यं विचारयेत् ।
अन्यथा भोजनाद्दोषात् सिद्धिहानिः प्रजायते ॥
शस्तान्नञ्च समश्नीयात् मन्त्रसिद्धिसमीहया ।
तस्मान्नित्यं प्रयत्नेन शस्तान्नाशी भवेन्नरः ॥"
अगस्त्यसंहितायाम् ।
"दधि क्षीरं घृतं गव्यं ऐक्षवं गुड़वर्ज्जितम् ।
तिलाश्चैव सिता मुद्गाः कन्दः केमुकवर्ज्जितः ॥
नारिकेलफलञ्चैव कदली लवली तथा ।
आम्रमामलकञ्चैव पनसञ्च हरीतकी ॥
व्रतान्तरे प्रशस्तञ्च हविष्यं मन्यते बुधैः ॥"
व्रतान्तर इति ।
"हैमन्तिकं सितास्विन्नं धान्यं मुद्गास्तिला यवाः ।
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका ॥
षष्टिका कालशाकञ्च मूलकं केमुकेतरत् ।
लवणे सैन्धवसामुद्रे गव्ये च दधिसर्पिषी ॥
पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी ।
पिप्पली जीरकञ्चैव नागरङ्गञ्च तिन्तिड़ी ॥
कदलीलवलीधात्रीफलानिगुड़मैक्षवम् ।
अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते ॥
भुञ्जानो वा हविष्यान्नं शाकं यावकमेव वा ।
पयो मूलं फलं वापि यत्र यत्रोपलभ्यते ॥
रम्भाफलं तिन्तिड़ीकं कमला नागरङ्गकम् ।
फलान्येतानि भोज्यानि एभ्योऽन्यानि विवर्ज्जयेत् ॥"
यत्तु योगिनीतन्त्रे ।
"चिञ्चाञ्च नालिकाशाकं कलायं लकुचं तथा ।
कदम्बं नारिकेलञ्च व्रते कुष्माण्डकं त्यजेत् ॥"
तत्तु व्रतान्तरे बोध्यम् । चिञ्चा तिन्तिड़ी ॥ * ॥

अथ वर्ज्यानि ।

"विवर्ज्जयेन्मधु क्षारलवणं तैलमेव च ।
ताम्बूलं कांस्यपात्रञ्च दिवाभोजनमेव च ॥"
तथा ।
"क्षारञ्च लवणं मांसं गृञ्जनं कांस्यभोजनम् ।
माषाढ़कीमसूरांश्च कोद्रवांश्चणकानपि ॥
अन्नं पर्य्युषितञ्चैव निःस्नेहं कीटदूषितम् ॥"
रामार्च्चनचन्द्रिकायाम् ।
"मैथुनं तत्कथालापं तद्गोष्ठीः परिवर्ज्जयेत् ।
ऋतुकालं विना मन्त्री स्वस्त्रियं नैव गच्छति ॥
लवणञ्च पलञ्चैव क्षारं क्षौद्रं रसान्तरम् ।
कौटिल्यं चौरमभ्यङ्गमनिवेदितभोजनम् ॥
असङ्कल्पितकृत्यञ्च वर्ज्जयेन्मर्द्दनादिकम् ।
स्नायाच्च पञ्चगव्येन केवलामलकेन वा ॥
मन्त्रजप्ताम्बुपानीयैः स्नानाचमनभोजनम् ।
कुर्य्याद्यथोक्तविधिना त्रिसन्ध्यं देवतार्च्चनम् ॥
अपवित्रकरो नग्नः शिरसि प्रावृतोऽपि वा ।
प्रलपन् प्रजपेद्यावत्तावत् निष्फलमुच्यते ॥"
नारदीये ।
"मृदु सोष्णं सुपक्वञ्च कुर्य्याद्वै लघु भोजनम् ।
नेन्द्रियाणां यथा वृद्धिस्तथा भुञ्जीत साधकः ॥"
कुलार्णवेऽपि ।
"यस्यान्नपानपुष्टाङ्गः कुरुते धर्म्मसञ्चयम् ।
अन्नदातुः फलस्यार्द्धं कर्त्तुश्चार्द्धं न संशयः ॥
तस्मात् सर्व्वप्रयत्नेन परान्नं वर्ज्जयेत् सुधीः ।
पुरश्चरणकालेषु सर्व्वकर्म्मसु शाम्भवि ! ॥
जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात् ।
परस्त्रीभिर्म्मनो दग्धं कथं सिद्धिर्व्वरानने ! ॥"
परान्नं भिक्षितेतरविषयम् । भिक्षायां तस्य स्वत्वोत्पादात् । तथा च ।
"वैदिकाचारयुक्तानां शुचीनां श्रीमतां सताम् ।
सत्कुलस्थानजातानां भिक्षाशी चाग्रजन्मनाम् ॥